॥ सुभाषितावली ॥

Accession No:- ~~6630~~ M1202

Title:- सुभाषितावली

Author:- ?

Subject:- ?

Date:- संवत् 1840

पत्रे:- 18

मु०
॥१॥

श्रीगणेशाय नमः॥ विद्वत्त्वं च नृपत्वं च नैव तुल्यं कदाचन॥ स्वदेशे पूज्यते राजा
विद्वान् सर्वत्र पूज्यते॥१॥ यद्यपि नवनिविडपीवरस्तनी हंकारवेषपरिहीना॥ सज्जन
सभाप्रविष्टा भाति विद्याधिको नरः॥२॥ अपूर्वः शब्दकोशोयं विद्यते तव भार
ति॥ व्ययतो वृद्धिमायाति क्षयमायाति संचयतः॥३॥ गुरुः॥ क्रुद्धो गुरुर्यदि तिथा
निबद्धां शिष्यः शिष्यो मध्याह्नसूर्य इव तिनानि दहति शिष्यं॥ तान्येव काव्यपरिणाम
सुखावहानि पश्चाद्भवंति कुसुमाकरशीतलानि॥४॥ अन्यानि शास्त्राणि
विनोदमात्रं प्राप्तेषु कालेषु न तेषु किंचित्॥ चिकित्सितं ज्योतिष मंत्रवादं
पदे पदे प्रत्ययमावहंति॥५॥ विद्याप्राप्तिः॥ अल्पस्रोतः मंदबुद्धिश्च सुखिनो व्या
धिपीडितः॥ निद्रालुः कामुकश्चैव षडेते शास्त्रवर्जिताः॥६॥ वेश्यानामि

राम
॥१॥

व ह

वपिघानां बैहलोप्रस्त्रवं विनः॥ हृदयग्राहिण्यस्ताः कंभवंति विरलाज
नाः॥७॥ नाहं स्वोपहतेन नान्यमनसा नाचार्यविद्वेषिणा नाध्ये भंगक
टाक्ष विस्मयकरीं सीमंतिनीं ध्यायता॥ नान्य घोषवता न च प्रसवता
मानं च नोत्कर्षिणा लोके ख्यातिकरः सतामविकलो विद्यागुणः प्राप्य
ते॥८॥ मूर्खबिंदु॥ मूर्खत्वं हि सखे ममापि रुचिरं यस्मिन्नदष्टौ गुणाः॥ श्रे:
निश्चिंतो बहुभोजनोऽत्रपमनाः रात्रौ दिवा सुप्यते॥ कार्याकार्यविचा
रांधबधिरो मानापमाने समौ कृत्वा सर्वजनस्य मूर्ध्नि पदं मूर्खः सु
खं जीवति॥९॥ उपदेशो हि मूर्खाणां प्रकोपाय न शांतये॥ पयःपानं भुजं
गानां केवलं विषवर्द्धनं॥१०॥ वरं गर्भस्रावो वरमृतुषु नैवाभिगमनं वरं
जातः प्रेतो वरमपि च कन्यैव जनिता॥ वरं वंध्या भार्या वरमपि च गर्भेषु

सु॰
॥२॥

वसन्निर्नेचाविद्वान्रूपद्रविणबलयुतोपिनरः॥११॥ पंडितनिंदा॥प्र
स्तावेयःसभामध्येभाषतेनसुभाषितं॥ विदुषस्तस्यविद्वत्वेपलालफलसं
निभं॥१२॥ पापठीतिसकलंवाङ्मयंयोबुधीतिनचकिंचिदप्यसौ॥रत्नभारमिव
गर्दभःसदावावहीतिनचवोबुधीतिसः॥१३॥ किंकवेस्तस्यकाव्येनकिंकांडेनध
नुष्मतां॥परस्यहृदयंलग्नंनघूर्णयतितच्छिरः॥१४॥ बुभुक्षितैर्व्याकरणंनभु
ज्यतेपिपासितैःकाव्यरसोनपीयते॥नछंदसाकेनसमुद्धृतंकुलंहिरण्यमेवार्ज
यनिष्फलाःकलाः॥१५॥ वचनद्वारं॥हेजिह्वेकटुकस्नेहेमधुरंकिंनभाषसे॥मधु
रंवदकल्याणिलोकेहिमधुरंप्रियं॥१६॥ प्रियवाक्यप्रदानेनसर्वेतुष्यंतिजंतवः॥
२२ तस्मात्तदेववक्तव्यंवचनेकिंदरिद्रता॥१७॥ हेतुयुक्तंचतथ्यंचसत्यंसाधुजनप्रियं॥
याहिवक्तुंनजानातितांजिह्वांकिंचरक्षसि॥१८॥ वचस्तस्यप्रयोक्तव्यंप्रयोक्ते ॥२॥

लभ्यतेफलं॥स्वादुर्भवतिचात्यंतंरागःशुक्लपटेयथा॥१९॥ बुद्धिः॥उदीरितो
र्थःपशुनापिबुध्यतेहयाश्चनागाश्चवहंतिनोदिताः॥अनुक्तमप्यूहतिपंडितोज
नःपरेंगितज्ञानफलाहिबुद्धयः॥२०॥ संतः॥निंदंतुनीतिनिपुणायदिवास्तुवं
तुलक्ष्मीःसमाविशतुगच्छतुवायथेष्टं॥अद्यैववामरणमस्तुयुगांतरेवान्या
य्यात्पथःप्रविचलंतिपदंनधीराः॥२१॥ उपकारः॥रत्नाकरःकिंकुरुतेपदार्थैः
किंचापिविंध्यःकरिभिःकरोति॥श्रीखंडखंडैर्मलयाचलोवापरोपकारायस
तांविभूतयः॥२२॥ उपकर्तुःप्रवरःप्रत्युपकारंकरोतिमध्यमः॥नीचस्तदपिनकुरु
तेउपकारेपिवहतिशत्रुतां॥२३॥ पिबंतिनद्यःस्वयमेवनांभःस्वादंतिनस्वादुफ
लानिवृक्षाः॥अंभोधरोवर्षतिनात्महेतोःपरोपकारायसतांविभूतयः॥२४॥
किंकिंनोपकृतंतेनकिंनदत्तंमहात्मना॥प्रियंप्रसंनवक्त्रेणप्रथमंसमुदाहृतं॥२५॥

सु॰ ॥३॥

न२

समयः॥ यः प्राज्ञः कावसरे न गुणैर्भूपैः प्रसार्यते स्वकरः॥ अनवसरे गुणको
हृदयाद्गत्वा धिते स हरः॥२६॥ समयापः॥ गिरयो गुरवस्तेभ्यो भिद्यंते धरापे न विदीर्यंते॥
संहतेः पश्य माहात्म्यं तृणैर्वारि तितीर्यते॥२७॥ बहूनां सारभूतानां समवा
यो दुरत्ययः॥ तृणैर्विरच्यते रज्जुर्बध्यंते दंतिनस्तथा॥२८॥ असहायत्वमेको
केन लभते गणनां न कश्चिदप्येकः॥ एकोऽप्यन्यसहायेन गणनां याति चदशोन्तरं
चद्विः॥२९॥ सुपरिवारः॥ सेवा भूमिस्तदेवांभः पश्य पुत्र विशेषतः॥ आम्रोम
धुरतां नित्यं कटुतां निंबपादपे॥३०॥ प्रतिज्ञा॰ दिग्गजकमठकुलाचलफ
णिपापि चलंति वसुधेयं॥ प्रतिपन्नममलमनसां न चलति पुंसां युगांते
पि॥३१॥ प्रारभ्यते न खलु विघ्नभयान्नीचैः प्रारभ्य विघ्नविहता विरमंति
मध्याः॥ विघ्नैः सहस्रगुणितैरपि हन्यमानाः प्रारब्धमुत्तमगुणा न परित्यजं ॥३॥

न२

ति॥३२॥ बलं॰ हस्ती स्थूलतनुः स चांकुशवशः किं हस्तिमात्रोंऽकुशो वज्रे
णाभिहताः पतंति गिरयः किं वज्रमात्रो गिरिः॥ दीपे प्रज्वलिते प्रणश्यति
तमः किं दीपमात्रं तमस्तेजो यस्य विराजते स बलवान्स्थूलेषु कः प्रत्ययः॥३३॥
अहंकारः॰ अभिमानो धनं येषां चिरंजीवंति ते नराः॥ अभिमानेन हीना
नां किं धनेन किमायुषा॥३४॥ सत्पुरुषनिंदा॰ शैत्यं नाम गुणस्तवैव तदनु
स्वाभाविकी स्वच्छता किं ब्रूमः शुचितां भवंति शुचयः संगेन यस्यापरे॥ किं
चातः परमस्ति ते स्तुतिपदं त्वं जीवनं जीविनां त्वं चेन्नीचपथेन गच्छसि पय
यः कस्त्वां निरोद्धुं क्षमः॥३५॥ तापो नापगतस्तृषा न च कृता धौता न धूलि
स्तनोर्न स्वच्छंदमकारि कंदकवलं का नाम केलीकथा॥ दूरोन्नतकरेण हंत
करिणा स्पृष्टा न सा पद्मिनी प्रारब्धो मधुपैर्नकारणमहो झंकारकोलाहलः॥३६॥

सु॰
॥५॥

नीचवर्गनिंद्यः॰ तावद्गर्जति मंडूकः कूपमाश्रित्य निर्भयः॥ यावत्करिकरा
कारः कृष्णसर्पो न दृश्यते॥३७॥ अवंशपतितो राजा मूर्खविप्रोहि पंडितः॥
निर्धनी धनमासाद्य तृणवन्मन्यते जगत्॥३८॥ यद्यपि स्नातमत्कुंकुमचं
दनवासितं सुतनं॥ तदपि न भवति सुगंधि प्रकृतिगुणं जातिदोषेण॥३९॥ न
हि शिष्यते गच्छति हंस स्त्रीस्याना कायसो न दत्ति कोकिलास्वरं॥ यथा प्रकी
र्णा न भवंति शिशास्वयस्तथा हि नीचः प्रकृतिं न मुंचति॥४०॥ गर्जति शरदि न व
र्षति वर्षति वर्षासु निःस्वनो मेघः॥ नीचस्तद्वपनकुरुते न वदति कुरुते च
सज्जनो लोकः॥४१॥ राजदंडभयात्पापं नाचरंत्यधमा जनाः॥ परलोकभया
न्मध्याः स्वभावादेव चोत्तमाः॥४२॥ पुरुषजन्मनिंदा धर्मार्थकाममोक्षा
णां यस्यैकोपि न विद्यते॥ अजागलस्तनस्येव तस्य जन्म निरर्थकं॥४३॥
जिह्वा दग्धा परान्नेन हस्तौ दग्धौ प्रतिग्रहात्॥ मनो दग्धं परस्त्रीभिर्मंत्रसि

राम
॥५॥

भं

द्धिः कथं भवेत्॥४४॥ गुणाधिकारः॥ न सौख्यसौभाग्यकरा गुणा नृणां
स्वयं गृहीता युवतीस्तनाइव॥ परैर्गृहीतं न तदा विराजते न ते नाथ हृति
निर्गुणा बंधाः॥४५॥ गुणा गुणज्ञेषु गुणी भवंति ते निर्गुणं प्राप्य भवंति
दोषाः॥ सुस्वादुतोयं प्रवहंति नद्यः समुद्रमासाद्य भवंत्यपेयाः॥४६॥ पुत्रः॥ वि
भातैर्यथा गेहं विना देहस्तथात्मना॥ जल विना यथा मत्स्यो विना पुत्रं तथा कुलं॥
॥४७॥ अपुत्रस्य गृहं शून्यं दिशः शून्या हि बांधवाः॥ मूर्खस्य हृदयं शून्यं
सर्वशून्यं दरिद्रता॥४८॥ गुणस्तुतिः॥ गुणैरुत्तुंगतां याति नोच्चैरासनसं
स्थितः॥ प्रासादशिखरस्थोपि काकः किं गरुडायते॥४९॥ गुणेषु क्रियतां
यत्नः किमाटोपैः प्रयोजनं॥ विक्रीयंते न नादेन गावः क्षीरेण वर्जिताः॥
॥५०॥ गुणिनः समीपवर्तित्वा स्वज्योतिरोकाद्गुणहीनोपि॥ विमलेक्षणपात्र

संगाद्दुर्जनमाप्नोति कालिमा हीनतां परा।। गुणयुक्तो दरिद्रः।। गुणयुक्तोप्यधो याति रिक्तः कूपे घटो यथा।। गुणहीनोपि संपूर्णो घटः शिरसि धार्यते।।५०।। रूक्षोपि दुष्ट एव स्यात् दुष्टसंयोगमाश्रितः।। आश्लेषां [illegible] यो [illegible] तः पुत्रोपि न विलोक्यते।।५२।। दुर्जननिंदा॰ पोतो दुस्तरवारिराशितरणे दीपोंधकारागमे निर्वाते व्यजनं मदांधकरिणां दर्पोपशांत्यै सृणिः।। इत्थं तद्भुवि नास्ति यस्य विधिना नोपायचिंता कृता मन्ये दुर्जनचित्तहरणे धातापि भग्नोद्यमः।।५४।। खलः शक्तिविहीनोपि ददाति कलहं सताम्।। दुग्धधौतोपि किं याति वायसः कलहंसताम्।।५५।। चंदनादपि संभूतो दहत्येव हुताशनः।। विशिष्टकुलजातोपि यः खलः खल एव सः।।५६।। अहो प्रकृतिसादृश्यं श्लेष्मणो ।।५७।।

जो

दुर्जनस्य च।। मधुरैः कोपमायाति कटुकैरुपशाम्यति।।५७।। दुर्जनसंगतिः।। संतप्तायसि संस्थितस्य पयसो नामापि न ज्ञायते मुक्ताकारतया तदेव नलिनीपत्रस्थितं राजते।। स्वात्यां सागरशुक्तिमध्यपतितं मुक्ताफलं जायते प्रायेणाधममध्यमोत्तमगुणाः संसर्गतो जायते।।५८।। [illegible] फलं त्यजंति विहगाः दग्धं वनांतं मृगाः पुष्पं पीतरसं त्यजंति मधुपाः शुष्कं सरः सारसाः।। निर्द्रव्यं पुरुषं त्यजंति गणिका भ्रष्टं नृपं मंत्रिणः सर्वे कार्यवशाज्जना हि नराः कः कस्य वा वल्लभः।।५९।। एकाग्र समाविष्टासनमिदं प्रीतास्मि ते दर्शनात् का वार्ता ननु दुर्बलोसि हि भयात् कस्माच्चिरं दृश्यते।। कूर्मो वंगाहमागतेष्वरण्यविनीये भाषयं स्यादनातेषां गुरुरपमं कितेन मनसा गंतुं गृहे सर्वे दाराः।। पेवी गौतन्वीव हन्मध्ये विस्ती च पदे पदे।। निवर्त्तते कदाचिन्न

आदौ

(6)

सु॰
॥६॥

सत्तां मैत्री सरित्समा ॥६१॥ विद्या मित्रं प्रवास[...]स्य धर्मो मित्रं [...]मृत
स्य च ॥ व्याधितस्यौषधं मित्रं भार्या मित्रं पुनः पुनः ॥६२॥ प्राप्ते भये भयात्त्राणं
प्रीति विश्रंभभाजनं ॥ केन रत्नमिदं सृष्टं भार्या मित्रं पुनः पुनः ॥६३॥ आरंभगु
र्वी क्षयिणी क्रमेण लघ्वी पुरा वृद्धिमती च पश्चात् ॥ दिनस्य पूर्वार्धपरार्धभि
न्ना छायेव मैत्री खलसज्जनानां ॥६४॥ ददाति प्रतिगृह्णाति गुह्यमाख्याति पृ
च्छति ॥ भुंक्ते भोजयते चैव षड्विधं प्रीतिलक्षणं ॥६५॥ ईश्वरेण समं प्रीतिर्मि
मेलक्षणेनो चेत् ॥ गते च गौरवं नास्ति आगते च धनक्षयः ॥६६॥ अनादरः ॥
नाश्चन्ति तरलानि समुद्र आनि परीक्षकाय त्र न संति देशे ॥ त्रिलक्षमूल्यं रख
मुचं द्रुकांते स्त्रिभिर्वराटैः प्रवदंति गोपाः ॥६७॥ छेदश्चंदनचूतचंपकवनेन
क्षा करीरद्रुमे हिंसा हंसमयूरकोकिलकुले काकेषु लीलारतिः ॥ मातंगेषु

॥६॥

खरेषु पासमतुला कर्पूरकर्पासयोरेवा यत्र विचारणा गुणिगणे देशा
य तस्मै नमः ॥६८॥ स्वजनिजगुणाभिमानं परकृतपतितोसि निर्गुणे
वर्णिजि ॥ काचमणो वर्णितमूल्यं यदितद पित्तेभूयि ॥६९॥ परनिंदा ॥ प्रा
येणात्र कुलं कुकुरजाः स्त्री वल्लभं दुर्भगा दातारं कृपणाः शुचीन्न शुच
यो वित्तान्वितं निर्धनाः ॥ वैरूप्योपहताश्च कांत पुरुषं धर्मान्वितं पापिनो
नानाशास्त्रविचक्षणं च पुरुषं निंदंति मूर्खा जनाः ॥७०॥ दक्षमानाः सु
नीचैर्गुणी नीचाः परयशोग्निना ॥ अशक्तास्तत्पदं गंतुं ततो निंदां प्रकुर्वते ॥
॥७१॥ उपहासः ॥ कालस्य खिल मकारणहास्यस्त्रीषु विवाद मर्ज्जनसे
वा ॥ गर्दभयानमसंस्कृतवाणी षट्सु नरो लघुतामुपयाति ॥७२॥ नारी
परमुखाप्रेक्षी कवि नम्र वहार विना ॥ अपथ्यसेवी रोगी च कियद्दिनैप

सु०

॥७॥

हास्यते ॥७३॥ माता पिता नरो राजन मित्रो चोपनेता च यश्च विद्यां प्रयच्छ
ति ॥ अन्नदाता भयत्राता पंचैते पितरः स्मृताः ॥७४॥ राजपत्नी गुरोः प
त्नी मित्रपत्नी तथैव च ॥ पत्नीमाता स्वमाता च पंचैते मातरः स्मृताः ॥७५॥
तीर्थेषु स्नानदानाद्यैः पुण्यमेवाहिकेवलं ॥ त्रिवर्गः प्राप्यते पुंभिः पित्रो
श्चरणसेवया ॥७६॥ बांधवप्रशंसा ॥ देशे देशे कलत्राणि देशे देशे
च पुत्रकाः ॥ न तं देशं प्रपश्यामि यत्र भ्राता सहोदरः ॥७७॥ कटुकस्यापि
वृक्षस्य धारया भवति शीतलता ॥ निर्गुणेष्वपि बंधुर्यः परः पर एव सः ॥७८॥ भा
गिनेयः ॥ उपकार प्रीतेना विद्यानेश्च्या संख्याविस्तरैः ॥ लालनात्प्रीतिप
र्वसि दग्नाद्यो भगिनीसुतः ॥७९॥ पुत्रस्तुतिः ॥ जातेन तापपातिनेवमसं
प्रसूतेस्नेहं न संहंतिनेव गुणान विलिलात्ति ॥ दुःखावसानसमये च तल

न१ स४

॥७॥

स्व

तों न धत्ते स सुत्रः सवसद्गुणनिको पि दीपः ॥८०॥ एकेनापि सुपुत्रेण विद्या
गुणशालिना ॥ सुरभीक्रियते गोत्रं चंदनेनेव काननं ॥८१॥ एकेनापि सु
पुत्रेण सिंही स्वपिति निर्भया ॥ सहैव दशभिः पुत्रैर्भारं वहति गर्दभी ॥८२॥
किं जातैर्बहुभिः पुत्रैः शोकसंतापकारकैः ॥ वरमेकः कुलालंबी यत्र वि
श्राम्यते कुलं ॥८३॥ पुत्रनिंदा ॥ एकेन शुष्कवृक्षेण दह्यमानेन वह्निना ॥
दह्यते तद्वनं सर्वं कुपुत्रेण कुलं यथा ॥८४॥ कन्यास्तुतिः ॥ भूषयत्यग्रजा का
पि कुलं कापि च दूषयति ॥ विशुद्धिरेषा [illegible] कापि हि कुलं कथ
ति ॥८५॥ वरस्तुतिः ॥ कुलं च शीलं च सनाथता च विद्या च वित्तं च वपु
र्वयश्च ॥ एतान्गुणान्सप्तपरीक्ष्य कन्या देया बुधैः शेषमचिंतनीयं
॥८६॥ रूपं वरयते कन्या माता वित्तं पिता श्रुतं ॥ बांधवाः कुलमिच्छंति

सु.

॥५॥

नासा३

मिष्टान्नमितरेजनाः॥८७॥ कन्यावरणं॥ वरयेत्कुलजांप्राज्ञो
विरूपामपिकन्यकां॥ सुरूपांसुंदरींनैवनीचस्यविवाहःसदृशेकुले॥
॥८८॥ काकाक्षीवक्त्रंप्रविरलदशनाश्यामनाटल्वोष्ठजिह्वाशुष्काङ्
गीसंहतभ्रूःकुचयुगविषमानैवखर्वातिदीर्घा॥ पिंगाक्षीरूक्ष
केशाखरपुरुषरवास्थूलजंघोर्द्धकेशाकन्येषावर्जनीयाधनसु
तरहितादुष्टशीलाचनित्यं॥८८॥ स्त्रीस्तुतिः॥ आदौधर्मधुराकुटुं
बनिचयेदक्षाचसाधारणाविश्वासेचसमीहितेचभगानीसज्जा
वशाचस्नुषा॥ व्याधौशोकपरिप्लुतेचजननीशय्यास्थितेकामिनी
त्रैलोक्येपिनविद्यतेभुविनृणांभार्यासमोबांधवः॥८९॥ स्त्रीनिंदा॥
दर्शनाद्धरतेतेजःस्पर्शनाद्धरतेबलं॥ संगाच्चहरतेआयुःनारीप्र ॥८॥

त्यक्षराक्षसी॥९०॥ एकंचस्थःकालकूटोपिशंभोःकिमपिनाकरोत्॥ सो
पिदंदह्यतेस्त्रीभिःस्त्रियोहिपरमंविषं॥९१॥ स्त्रीचरित्रं॥ यदंतस्तन्नजि
ह्वायांजिह्वायांयन्नतद्बहिः॥ यद्बहिस्तन्नकुर्वंतिविचित्रचरिताःस्त्रियः॥
॥९३॥ धिकृतस्यांधमनसःकुकवेःरुचित्वंयःस्त्रीमुखंचशशिनंचसमी
करोति॥ भ्रूभंगविभ्रमकटाक्षनिरीक्षितानिकोपःप्रसादहसितानिकुतः
शशांके॥९४॥ स्त्रीमुद्रांमकरध्वजस्यपरमांसर्वार्थसंपत्करींयेमूढाःप्र
विहाययांतिकुधियःस्वर्गादिमोहेच्छया॥ तेतेनैवनिहत्यनेदुततरं
नग्नीकृतामुंडिताःकेचित्संचशिखीकृताश्चभवेकापालिकाश्चापरे॥
॥९५॥ कंदर्पः॥ विकलयतिकलाकुशलंहरतिशुचिंपंडितंविडंबयति॥
अधीरयतिधीरपुरुषंक्षणेनमकरध्वजोदेवः॥९६॥ रागः॥ उत्खातंप्रति

मु

रोपयन्कुसुमितांश्छिन्दंल्लघून्वर्धयन्कंटकिनो बहिर्विरचयन्विश्ले-
षयन्संगतान्॥ अत्युच्चान्नमयन्नतान्समुदयन्म्लानान्मुहुः सेचयन्मा-
लाकार इव प्रयोगनिपुणो राजा चिरं नंदति॥९९॥ एक एव हि महान्दोषस्त्व-
दीये विमले कुले॥ लुं पंनिपेत्र कौंकी स्त्रिजानाजानाग्रणाधिका॥९८॥ अ-
थ राजनीतिः॥ क्रूरं व्यसनिनं लुब्धमसत्यमतं धिमनाकृतिं॥ मूर्खमन्यायक-
र्तारं नाधिपत्ये नियोजयेत्॥९९॥ सालसं पदीर्घसूत्रं च लुब्धं व्यसनिनं श-
ठं॥ असंतुष्टमसत्वं च त्यजेद्भृत्यं नराधिपः॥१००॥ वेदवेदांगतत्वज्ञो जप-
होमपरायणः॥ आशीर्वादपरो नित्यमेष राजपुरोहितः॥१०१॥ प्रवीणः कु-
शलो दक्षः स्वामिभक्तश्च नित्यशः॥ अलुब्धः सत्यवादी च भांडाकार-
नयोजयेत्॥१०२॥ इंगिताकारतत्वज्ञो बलवान्प्रियदर्शनः॥ नयानयप

रिज्ञस्तु प्रतीहारो विधीयते॥१०२॥ वैद्यशास्त्रकृताभ्यासः सर्वज्ञः प्रि-
यदर्शनः॥ आयुःशीलगुणोपेत एष वैद्यो विधीयते॥१०३॥ काणः खं-
जश्च मुंडश्च कुब्जो [illegible] वद्रूपश्च पांगवः॥ राजश्च स्वांतःपुरे नित्यं कर्तव्या-
रक्षका बुधैः॥१०४॥ मूर्खं वै नियोजितो मात्ये त्रयो दोषा महीपतेः॥ अयश-
श्चार्थहानिश्च नरके पतनं तथा॥१०५॥ नृपार्थं नृपसामर्थ्यं प्रियमर्म संचा-
वमानितं॥ अर्द्धराज्यहरं भृत्यं यो न हन्यात्स हन्यते॥१०६॥ दुष्टस्य दंडः स्व-
जनस्य पूजा न्यायेन कोपस्य च संप्रवृत्तिः॥ अहस्य पानो भिक्षुराष्ट्ररक्षा
पंचैव यज्ञाः कथिता नृपाणां॥१०७॥ पिता वा यदि भ्राता पुत्रो वा यदि वा
सुहृत्॥ प्राणच्छेदार्थं यदा छत्र हंतव्यो नास्ति पातकं॥१०८॥ विना देह-
रक्षणेन पत्री तदभावे च सा हिरण्यं॥ सा तद्भावे वैसम्य तं दिव्यं सर्वे बामेवानि

८०

॥१०॥

त्तिधः॥१०८॥प्रसन्नो (व) दनो हृष्टः स्पष्टवाक् प्रसन्नदृक्॥सभायां वक्तृसा
मर्थ्यः सत्यवादी नरः शुचिः॥१०९॥आदित्यचंद्रावनिलोऽनलोच द्यौर्भूमि
रापो हृदयं यमश्च॥अहश्च रात्रिश्च उभे च संध्ये धर्मश्च जानाति नरस्य वृत्तं॥ २

॥१११॥अधिकारं प्रपन्नोऽपि नरपतिहितकर्ता दुष्यतां याति लोके जनपति
हितकर्ता त्यज्यते पार्थिवेंद्रैः॥इति महति विरोधे वर्त्तमाने समानेन्न पति
जनपदानां दुर्लभः कार्यकर्त्ता॥११२॥प्राप्य वरानधिकारान् शत्रुसुमित्रेषु
बंधुवर्गेषु॥नापकृतं नोपकृतं न सत्कृतं किं कृतं तेन॥११३॥वरं वनं वरं भै
क्षं वरं भारोपजीवनं॥वरं व्याधिर्मनुष्याणां नाधिकारेण संपदः॥११४॥
सुहृतामुपकारकारणाद्द्विषतामप्यपकारकारणात्॥नृपसंश्रय इष्यते
बुधैर्जठरं को न बिभर्त्ति केवलं॥११५॥आसन्नमेव नृपतिर्भजिते मनुष्यं

राम

॥१२॥

कार२

विद्याविहीनमकुलीनमसंगतं वा॥प्रायेण भूमिपतयः प्रमदा लता
श्च यः पार्श्वतो भजति तं परिवेष्टयंति॥११६॥राजसेवा॥अप्रधानः
प्रधानः स्याद्यदि सेवेत पार्थिवं॥प्रधानोप्यप्रधानः स्याद्यदि सेवाविव
र्जितः॥११७॥विद्यावतो महेच्छानां गुणविक्रमशालिनां॥सेवावृत्ति
विधानं च नाश्रयः पार्थिवं विना॥११८॥अंतःपुरचरैः सार्द्धं यो न मे
त्रीं समाचरेत्॥ग्गकालोतैर्नैनरं दुस्य स भवे द्राजवल्लभः॥११९॥द्विष
द्द्वेषपरो यः स्याद्दिष्टानामिष्टकृत्तथा॥स नरो नरनाथस्य भवेदत्यंत

२

वल्लभः॥१२०॥वृत्तिच्छेदविधौ द्विजातिमरणे स्वामिग्रहे संकटे
प्राणत्राणपनायवणिकप्रपातृषार्त्ते कलत्रहरणे मित्रापदां वारणे॥
प्रपूर्ण(?) ... अपिस्फुरंतितरं॥१२१॥
नसांयेषांन शास्त्रमहास्त्रा नालोक्यते म्रियते स्व...

सु॰

॥११॥

दुर्गस्थानं॥ न गजानां सहस्रेण न वल्हेन च वाजिनां॥ यद्वशः साध्यते भूपे दुर्गेणैकेन तत्स्फुटं॥१२२॥ वैरवैकं॥ दत्वापि कन्यकां वैरी निहंतव्यो विनिश्चितं॥ अन्योपाये न शक्यो यो हंतते दोषो न विद्यते॥१२३॥ नवनीत समां वाणीं कृत्वा चित्तं च निर्दयं॥ तथा प्रवोध्यते शत्रुः शांतये व ध्रुवं यथा॥१२४॥ मूर्खसेवकः॥ राजा तुष्टोपि भृत्यानां मानमात्रं प्रयच्छति॥ तेपि सन्मानमात्रेण प्राणैरप्युपकुर्वते॥१२५॥ तद्वा-
न छलेदविनमस्तुभ्यं धैर्यविप्लवकारिणि॥ विश्वस्तैर्लोकयनाथापि यस्त्वया वामिनी कृतः॥१२६॥ समुद्रनिंदा॥ वातोच्छलितकल्लोल धिक्ते सागरगर्जितं॥ यस्य तीरे तृषाक्रांतः पांथः पृच्छति कूपिकां॥१२७॥ कलिः॥ धर्मप्रव्रजितस्तपः प्रचलितं सत्यं च दूरं गतं पृथ्वी

राम
॥११॥

मंदफलास्तपाश्च कुटिला द्विजाः कावंचकाः॥ लोकस्त्रीवशगाः स्त्रियोपि चपला लौल्यंगता ब्राह्मणाः साधुः सीदति दुर्जनः प्रभवति प्रायः प्रविष्टे कलौ॥१२८॥ शंखः॥ तातः क्षीरनिधिः स्वसा जलधिजा भ्राता सुरेशद्रुमः॥ सोऽनन्यं सह कौस्तुभेन शुचिता यस्याद्भवेशादपि॥ धिक्कर्मास्य स एव आधुना पाखंडतानां करे विभ्रामितः प्रतिवासरं प्रतिगेहं भैक्ष्येण कुक्षिंभरः॥१२९॥ आलस्य स्थिरता भ्रुपैति भजते चांचल्य मुद्योगिनां मूकत्वं मितभाषितं वितनुते भीरुत्वमार्जवं॥ पात्रापात्र विचारसार विरता गच्छत्युदारासौ मातर्लक्ष्मि तव प्रसादवशतो दोषा अपि स्युर्गुणाः॥१३०॥ लक्ष्मी निंदा॥ गच्छत्स्यन्यकरावलंबनकर ध्वस्तः पतत्यासनात् भ्रांतं पश्यति नो भटत्यो(?) जिह्मा हसायुक्तं च नो भाषते॥ ना

तां३

सु॰
॥१२॥

नावत्क्र्कसंचयैः परिवृतः सन्मंत्रसंसेवितो हाहा हा किं तु जगोप्युतं
न हि न हि श्रीगर्विता मानवाः ॥१३१॥ धनवर्द्धनं ॥ यस्यार्थास्तस्य
मित्राणि यस्यार्थास्तस्य बांधवाः ॥ यस्यार्थाः स पुमांल्लोके यस्यार्थाः
स च पंडितः ॥१३२॥ वयोवृद्धास्तपोवृद्धा ये च वृद्धा बहुश्रुताः ॥ ते स
र्वे धनवृद्धस्य द्वारे तिष्ठंति किंकराः ॥१३३॥ धननिंदा ॥ वरं हालाहलं
पीतं सद्यः प्राणहरं विषं ॥ न दृष्टं धनाढ्यस्य भ्रूभंगकुटिलान
नं ॥१३४॥ भक्ष्ये द्वेषो जडे प्रीती रुचिरं गुरुलंघनं ॥ मुखे च कटुता नि
त्यं धनिनां ज्वरिणामिव ॥१३५॥ आलंतोषः परे पीति प्रस्खलं तेन समेप
ख्यि ॥ अम्यक्रा[illegible]वभाषंते माषंते धनिनो मर्दपारुव ॥१३६॥ अर्थो

नि वि

राम
॥१२॥

नामर्जने दुःखमर्जितानां च रक्षणे ॥ आये दुःखं व्यये दुःखं धिग
र्थान् कष्टभाजनान् ॥१३७॥ दातव्यं भोक्तव्यं सति विभवे सचा॰ निस्यः ॥
पश्येह मधुकराणां संचितमर्थं हरंत्यपरे ॥१३८॥ कीटिकासंचितं धा
न्यं मक्षिकासंचितं मधु ॥ कृपणेनार्जिता लक्ष्मीः परैरेवोपभुज्यते ॥
॥१४०॥ वरं वनं व्याघ्रगजेंद्रसेवितं द्रुमालये पत्रफलांबु[illegible]भो
जनं ॥ तृणानि शय्या परिधान वल्कलं न बंधुमध्ये धनहीनजीवितं ॥
॥१४१॥ उत्पद्यंते विलीयंते निर्धनानां मनोरथाः ॥ बालवैधव्यदग्धा
नां कुलस्त्रीणां कुचा इव ॥१४२॥ तावद्गुणा गुरुत्वं च यावन्नार्थय
ते परान् ॥ अर्थी चेत्पुरुषो जातः क्व गुणः क्व च गौरवं ॥१४३॥ वित्तमूल्यं

सु॰
॥१३॥

जसन४ ॥ ममप

वदसि वृकशोदरीयते दीयते तेंद्रा रूपाणां अभयतिसद्दर्पोरूपमेकं च त्रुणि ॥ द्वेदानार्थौ ह्यमपि तथा पालने रवंडने वा नो जानीमः कथयति भवान्यकस्य धातोः प्रयोगं ॥१४४॥ शृङ्गी जातः कुदर्शनवशात् द्वैतयोगात्कपाली वस्त्राभावात् दिगाच्छितं तैलाध्वस्तात् ... जटावान ॥ इत्थं राजन्स्वदुपगमनादीश्वरत्वं मया प्तं अद्यापि त्वं नरपते नार्द्धचंद्रं ददासि ॥१४५॥ मृत्युः ॥

भयपरिहरति मृत्युः पंडितं श्रोत्रियं वा धनकनकसमर्थं वा द्रवीमानिवितं वा ॥ तपसि नियमयुक्तं दुःस्थितं सुस्थितं वा वनगजइव वह्निः सर्वभक्षी हुताशः ॥१४६॥ वैराग्यं ॥ अग्रे गीतं सरसकवयः पार्श्वयोः दाक्षिणात्याः पृष्ठे लीलावलयरणितं चामरग्राहिणीनां ॥ यद्यस्त्येवं कुरु भवरसास्वादने लंपटत्वं नो चेच्चेतः प्रविश सहसा निर्विकल्पे समाधौ ॥१४७॥

वा४

राम
॥१३॥
सं॰१२४

र

येषु पानरतं नरं कुपठितं मूर्खं परिव्राजकं बौद्धं कापुरुषं विडं विवसतिं स्वाध्यायहीनं द्विजं ॥ राज्यं वा सनरेंद्रं दुर्मंत्रिरहितं मित्रं छलान्वेषिणां भार्यां यौवनगर्वितां पर[illegible]तां मुंचंति ते पंडिताः ॥१४८॥ काके शौचं द्यूतकारेषु सत्यं सर्पे क्षांतिः स्त्रीषु कामोपशांतिः ॥ क्लीबे धैर्यं मद्यपे तत्त्वचिंता राजा मित्रं केन दृष्टं श्रुतं वा ॥१४९॥ सुखिनि सुखिनिवासो दुःखितानां विनोदः श्रवणहृदयहारी मन्मथस्याग्रदूतः ॥ रतिरभसविधानादुल्लसत्कामिनीनां जयति सुखनिधानः पंचमश्चोपवेदः ॥१५०॥ हरति हरिणचित्तं का कथा चेतनानां रसपतिरपि महेशं को वराको [illegible] नरेशः ॥ वितरति खलु भुक्तिं यः प्रयाणार्थसिद्धिं महह जगदभीष्टं कस्य सेव्यो न नादः ॥१५१॥

सु.
॥१४॥

मत्तेभकुंभदलने भुवि संति शूराः केचित्प्रचंडमृगराजवधेपि दक्षाः ॥
किंतु ब्रवीमि बलिनां पुरतः प्रसह्य कंदर्पदर्पदलने विरला मनुष्याः ॥१५२॥
भवितव्यता पातालमाविशतु यातु सुरेंद्रलोके किंवा पुनर्विशतु पर्वतेंद्रं ॥
मंत्रौषधप्रहरणैश्च करोतु रक्षां यद्भावितं भवति नात्र विचारहेतुः ॥१५३॥
उदयति यदि भानुः पश्चिमे दिग्विभागे विकसति यदि पद्मं पर्वताग्रे शि
लायां ॥ विचलति यदि मेरुः शीततां याति वह्निः नहि चलति नराणां भा
विनी कर्मरेखा ॥१५४॥ एरंडतां गच्छति कल्पवृक्षः ग्रावं च नाम शिलोच्चयदशा
मुपैति ॥ वंध्यायते कामदुघा च धेनुः स देवदेवोपहतस्य पुंसः ॥१५५॥ आ
रोहतु गिरिशिखरं प्रविशतु विवरं प्रयातु पाताले ॥ विधिलिखिताक्ष
रमालं फलति कपालं न भूपालः ॥१५६॥ पत्रं नैव यदा करीरविटपे दोषो

राम
॥१४॥

न

वसंतस्य किं नोलूकोप्यवलोकते यदि दिवा सूर्यस्य किं दूषणं ॥ वर्षा
नैव पतंति चातकमुखे मेघस्य किं दूषणं ॥ यत्पूर्वं विधिना ललाटलिखितं
मार्जितुं कः क्षमः ॥१५७॥ भवितव्यं भवत्येव नारिकेरफलांबुवत् ॥ गं
तव्यं गतमित्याहुर्गजभुक्तकपित्थवत् ॥१५८॥ उद्यमं साहसं धैर्यं बलं बुद्धि
पराक्रमं ॥ षडेते यस्य विद्यंते तस्मात् देवोपि शंकते ॥१५९॥ निर्दयो नरो

रा

यस्तु मुहूर्त्तमपि तिष्ठति ॥ तिष्ठते नत्र दारिद्र्यं विरोधी यत्र बांधवः ॥१६०॥
शशिनि खलु कलंकं कंटकं पद्मनाले जलधिजलमपेयं पंडिते निर्धनत्वं ॥
युवतिजनवियोगं दुर्भगत्वं स्वरूपे धनपतिकृपणत्वं निर्विवेकी विधाता
॥१६१॥ शशिदिवाकरयोर्ग्रहपीडनं गजभुजंगविहंगमयोरपि बंधनं ॥ मतिमतां
च निरीक्ष्य दरिद्रतां विधिरहो बलवानिति मे मतिः ॥१६२॥ चिंताद्वारं ॥ घृ

निर्द्धनस्य २

नलवणतैलरतं कुसुमवस्त्रधनविषयचिंतया सततं ॥ नश्यति विमलमते
रपि बुद्धिः पुरुषस्य ॥१६३॥ मद्यपानं ॥ एकतश्चतुरो वेदा ब्रह्मज्ञानं तु चैकतः ॥
एकतः सर्वपापानि मद्यपानं तु चैकतः ॥१६४॥ मांस० घातको अनुमंता च
भक्षकः क्रयविक्रयी ॥ लिप्यते मांसपापेन ये चान्ये न युधिष्ठिर ॥१६५॥
हिरण्यदानं गोदानं भूमिदानं तथैव च ॥ अभक्षणं मांसस्य नैव तुल्यं क
दाचन ॥१६६॥ अहिंसा- हेमधेनुधरादीनां दातारः सुलभा भुवि ॥ दुर्लभः
पुरुषो लोके यः प्राणिष्वभयप्रदः ॥१६७॥ वसंत्यरण्येषु चरंति दूर्वाः
पिबंति तोयान्यपरिग्रहाणि ॥ तथापि वध्या हरिणा नराणां को लो
कः किमारब्धयितुं प्रवृत्तः ॥१६८॥ असत्यं० नासत्यवादिनः सौख्यं न

च कीर्त्तिः कदाचन ॥ दृश्यते नापि कल्याणं कालकूटमिवाश्रितः ॥१६९॥ दिवा न
पश्यति जात्यंधः कामांधोपि न पश्यति ॥ न पश्यति मदोन्मत्तः स्वार्थी दोषं
न पश्यति ॥१७०॥ इंद्रियं० नायं सुखमः सचेतनस्तावदाकलयति धर्मं ॥
नावदहंतिमानमुत्तमं यावदिंद्रियवशं न गच्छति ॥१७१॥ मनःशुद्धिः ॥ दा
नं पूजा व्रतं चैव तीर्थसेवा श्रुतं तथा ॥ सर्वमेतद्व्यर्थं तस्य मनःशुद्धं न य
स्य वै ॥१७२॥ चिंता० यत्तं धातुबद्धं शरीरं चित्ते नष्टे धातवो यांति नाशं ॥

णी

तस्माच्चित्तं यत्नतो रक्षणीयं चित्ते स्वस्थे बुद्धयः संभवंति ॥१७३॥ दुर्मं
त्रान्नृपतिर्विनश्यति यतिः संगात्सुतो लालनाद्विप्रो नध्ययनात्कुलं
कुतनयाच्छीलं खलोपासनात् ॥ ह्रीर्मद्यादनवेक्षणादपि कृषिः स्ने

१७.
१८०

ह्रः प्रवासात्क्षयान्मैत्री चाप्रणयात्समृद्धिरनयाद्व्यायात्स्त्रिया कुलं ॥
॥१७४॥ शाठेन मैत्री कपटेन धर्मं परोपतापेन समृद्धिभावं ॥ सुखेन
विद्यां पुरुषेण नारीं वांछंति ये व्यक्तमपंडितास्ते ॥१७५॥ ज्ञातेन बु
द्धिर्व्यसनेन नम्रखिता प्रियेण नारी सहितेन निम्नगा ॥ निशा शशांकेन
धृतिः समाधिना नयेन चालंक्रियते नरेंद्रः ॥१७६॥ नागो भाति मदेन कं
जलं रुहैः पूर्णेंदुना शर्वरी शीलेन प्रमदा जवेन तुरगो नित्योत्सवैर्मंदि
रं ॥ वाणी व्याकरणेन हंसमिथुनैर्नद्यः सभा पंडितैः सत्पुत्रेण कुलं वना
नि कुसुमैर्नीत्या सुव्यक्तं विभुः ॥१७७॥ प्रत्यासन्ने विनाशाय दूरस्था न फ
लप्रदाः ॥ संसेव्या मध्यभागेन राजा वह्निर्गुरुः स्त्रियः ॥१७८॥ आचारः कुल
माख्याति देशमाख्याति भाषितं ॥ संभ्रमः स्नेहमाख्याति वपुराख्याति भो

संभ्रमस्त्वादरे भये त्वमरः।

राम
॥१६॥

ज्ञा

जनं ॥१७९॥ रोगे पथ्यं प्रमादेन थ्यं खले न्यायं रिपोर्हास्यकः ॥ ज्ञानेन ध्यानेन व
स्त्रदानेन स्त्रेणमादिव मोक्षधं ॥१८०॥ धनधान्यप्रयोगेषु विद्यासंग्रहणेषु च ॥
आहारे व्यवहारे च त्यक्तलज्जः सुखी भवेत् ॥१८१॥ व्यवसायेन दारिद्र्यं पठतो

मूर्खतार

नास्ति मौनेन न कलहो नास्ति जागरतो भयं ॥१८२॥ शास्त्रं सुनिश्चि
तधिया परिचिंतनीयं स्वाराधितोपि नृपतिः परिशंकनीयः ॥ आत्मीकृ
ता च युवती परिशंकनीया शास्त्रे नृपे च युवतौ च कुतो वशित्वं ॥१८३॥ न

ग

भाद्रकर्पूरेन चमत्स्य पजे नोम्रदे फलैर्वा पुष्पैर्वा न च मिलति यादकु
परिमलः ॥ परं त्वेको दोषस्त्वयि खलु रसाले यदधिकः पिके वा का
के वा लघुगुरु विशेषो न भवति ॥१८४॥ वरं करीरो मरुमार्गवर्तीयः पां
थसेवा कुरुते पदार्थैः ॥ किं कल्पवृक्षैः कनकाचलस्थैर्यैः परोपकारं प्रतिपत्सं

17

सु·

॥१७॥

भद्रस्य वै॥१८५॥ नीरसस्यापि रोचंते कार्पासस्य फलानि च॥ येषां हि सततं जन्म परेषां गुह्यगुप्तये॥१८६॥ क्षुधा॥ आदौ रूपविनाशिनी कृशकरी कामस्य विध्वंसिनी ज्ञानं मंदकरी तपः क्षयकरी धर्मार्थनिर्मूलिनी॥ पुत्रभ्रातृकलत्रभेदनकरी लज्जा कुलच्छेदिनी सा मां पीडति सर्वदोषजननी प्राणप्रहारी क्षुधा॥१८७॥ ग्रामेस्मिन्वद को महान्स्तालद्रुमाणां धनं को दाता रजको ददाति वसनं प्रातर्गृहीत्वा निशि॥ को विद्वान्परवित्तसंग्रहविधौ सर्वेपि पौराजनाः कस्माज्जीवसि हे सखे विषकृमिन्यायेन जीवाम्यहं॥ दुर्जनः॥ खलः सर्षपमात्राणि परच्छिद्राणि पश्यति॥ आत्मनो बिल्वमात्राणि पश्यन्नपि न पश्यति॥१८८॥ दारिद्र्यः॥ हे दारिद्र्य न

राम
॥१७॥

सु· संवत-१८५·

॥१८॥

मस्तुभ्यं सिद्धोहं त्वत्प्रसादतः॥ पश्याम्यहं जगत्सर्वं न मां पश्यति कश्चन॥१८९॥ उत्तिष्ठ क्षणमात्रमुद्वह सखे दारिद्र्यभारं मम श्रांतस्तावदहं चिरं मरणमपि सेवे च दीयं सुखं॥ इत्युक्तो धनवर्जितेन बहुशो नीतः स्मशाने शवो दारिद्र्यान्मरणं वरं वरमिति ज्ञात्वैव तूष्णीं स्थितः॥१९०॥ चांडालश्च दरिद्रश्च द्वावेतौ सदृशाविह॥ चांडालस्य न गृह्णंति दरिद्रो न प्रयच्छति॥१९१॥ संतोषः॥ सर्पाः पिबंति पवनं न च दुर्बलास्ते वन्यैस्तृणैर्वनगजा बलिनो भवंति॥ कंदैः फलैर्मुनिवरा क्षपयंति कालं संतोष एव पुरुषस्य परं निधानं॥१९२॥ अवश्यंभाविनो भावा भवंति महतामपि॥ नग्नत्वं नीलकंठस्य महाहिशयनं हरेः॥१९३॥ ॥ इति श्रीसुभाषितावली समाप्ता॥ शुभमस्तु॥ अदः पुस्तकं नेरश्वरभट्टेनाम्नेरिकि वोठस भट्ट साक्षी

राम
॥१८॥